बलभद्रा, स्त्री, कुमारी। त्रायमाणा। इति मेदिनी। दे, २८४ ॥ (अस्याः पर्य्यायो यथा,—
"बलभद्रा त्रायमाणा त्रायन्ती गिरिसानुजा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

बलभद्रिका, स्त्री, ( बलभद्रेव। बलभद्रा+स्वार्थे कन्। कापि अत इत्वम्। ) त्रायमाणा। इत्यमरः। २। ४। १५० ॥

बलरामः, पुं, ( रम+भावे घञ्। बलेन रामो रमणं यस्य। ) बलदेवः। यथा,—
"बलरामानुजः श्रीमान् गजेन्द्रस्तुतपादकः ॥"
इति नारदपञ्चरात्रे चतुर्थरात्रीयः ८ अध्यायः ॥
अस्य ध्यानम्।
"अन्तरे दिव्य उद्याने हरिचन्दनसंज्ञके।
तत्राधस्तात् स्वर्णपीठे विचित्रे मणिमण्डपे ॥
तन्मध्ये मणिमाणिक्यदिव्यसिंहासनोज्ज्वले।
तत्रोपरि च रेवत्या सङ्कर्षणहलायुधम् ॥
ईश्वरस्याभयानन्तमभिन्नगुणरूपिणम्।
शुद्धस्फटिकसंकाशं रक्ताम्बुजदलेक्षणम् ॥
नीलचैलधरं स्निग्धं दिव्यगन्धानुलेपनम्।
कुण्डलाश्लिष्टसद्गण्डं दिव्यस्रगम्बरस्रजम् ॥
मधुपाने सदासक्तं मदाघूर्णितलोचनम्।
सुबलं दक्षिणे पाणौ बलरामं सदा स्मरेत् ॥"
इति कश्चिन्निबन्धः ॥

बललः, पुं, ( बलं लातीति। बल+ला+क। ) बलरामः। इत्यमरटीकायां भरतः ॥

बलवत्, व्य, (बलमस्यास्तीति। बल+मतुप्। मस्य वः।) अतिशयम्। इत्यमरः। ३।४।१ ॥ (यथा, शाकुन्तले प्रस्तावनायां सूत्रधारस्योक्तिः।
"बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः ॥")

बलवान् [ त् ], त्रि, ( बलमस्यास्तीति। बल+मतुप्। मस्य वः। ) बलविशिष्टः। तत्पर्य्यायः। मांसलः २ अंसलः ३। इत्यमरः। ३।१।४४ ॥ वीर्य्यवान् ४ बली ५। इति शब्दरत्नावली ॥ ( यथा, मनुः। १। ७६।
"आकाशात्तु विकुर्व्वाणात् सर्व्वगन्धवहः शुचिः।
बलवान् जायते वायुः स वै स्पर्शगुणो मतः ॥")

बलवर्द्धिनी, स्त्री (बलं वर्द्धयतीति। बल+वृध+णिच्+णिनिः। ङीप्।) जीवकौषधिः। इति जटाधरः ॥

बलविन्यासः, पुं, ( बलानां सैन्यानां विशेषेण दुर्भेद्यत्वेन न्यासः स्थापनम्। ) युद्धार्थं सैन्यस्य देशविशेषे विभज्य दुर्लङ्घ्यत्वनिमित्तं स्थापनम्। तत्पर्य्यायः। व्यूहः २। इत्यमरः। २।८।७६ ॥ ( बलविन्यासास्तु मकरपद्मादिभेदात् बहवः। तत्र संक्षेपतो मनुना युद्धयात्रार्थं केचिन्निर्द्दिष्टाः। यथा, मानवे। ७। १८७—१९१।
"दण्डव्यूहेन तन्मार्गं यायात्तु शकटेन वा।
वराहमकराभ्यां वा सूच्या वा गारुडेन वा ॥
यतश्च भयमाशङ्केत् ततो विस्तारयेद्बलम्।
पद्मेन चैव व्यूहेन निविशेत सदा स्वयम् ॥
सेनापतिबलाध्यक्षौ सर्व्वदिक्षु निवेशयेत्।
यतश्च भयमाशङ्केत् प्राचीं तां कल्पयेद्दिशम् ॥
गुल्मांश्च स्थापयेदाप्तान् कृतसंज्ञान् समन्ततः।
स्थाने युद्धे च कुशलानभीरूनविकारिणः ॥
संहतान् योधयेदल्पान् कामं विस्तारयेद्बहून्।
सूच्या वज्रेण चैवैतान् व्यूहेन व्यूह्य योधयेत् ॥")

बलसूदनः, पुं, ( बलं तन्नामा प्रसिद्धं असुरं सूदयतीति। बल+सूद+ल्युः। ) इन्द्रः। इति हलायुधः ॥ (यथा, देवीभागवते। ५।३।१३।
"गोपितव्यं गृहाणाशु युद्धाय बलसूदन ! ॥"
विष्णुः। इति देवीपुराणे ४७ अध्यायः ॥ )

बलस्थितिः, स्त्री, (बलानां स्थितिरवस्थानं यत्र। अभिधानात् स्त्रीत्वम्। ) शिबिरम्। इति त्रिकाण्डशेषः ॥

बलहा, [न्], पुं, (बलं सामर्थ्यं हन्तीति। बल+हन्+क्विप्। ) श्लेष्मा। इति शब्दरत्नावली ॥ (बलं तन्नामानमसुरं हन्तीति। इन्द्रः ॥ परबलविनाशके, त्रि। यथा, हरिवंशे। ११०।४२।
"तत्राहं युध्यमानस्तु भ्रातास्य बलहा बली।
स्थितो ममाग्रतः शूरो गदापाणिर्हलायुधः ॥")

ब(व)ला, स्त्री, ( कार्य्यकारित्वेन बलमस्त्यस्याः। बल+अर्श आद्यच् ततष्टाप्। ) क्षुपविशेषः। बाला इति वाड़ियाला इति भाषा। तत्पर्य्यायः। वाट्यालकः २। इत्यमरः। २।४।१०७ ॥ समङ्गा ३ ओदनिका ४ भद्रा ५ भद्रोदनी ६ खरकाष्ठिका ७ कल्याणिनी ८ भद्रबला ९ मोटा १० पाटी ११ बलाढ्या १२। इति राजनिर्घण्टः ॥ शीतपाकी १३ वाट्या १४ वाटी १५ विनया १६ वाट्याली १७ वाटिका १८। इति शब्दरत्नावली ॥ अपि च।
"वाट्यालको वाट्यपुष्पी समांसा विलला बला।
श्वेतवाड़ियाला इति भाषा ॥
ऋष्यप्रोक्ता ततिबला पीतपुष्पी महाबला।
पीतवाड़ीयाला।" इति रत्नमाला ॥ अस्या गुणाः। अतितिक्तत्वम्। मधुरत्वम्। पित्तातिसारनाशित्वम्। बलवीर्य्यप्रदत्वम्। पुष्टिकफरोधविशोधनञ्च। इति राजनिर्घण्टः ॥ अथ बलाचतुष्टयनामादि।
"बला वाट्यालिका वाट्या सैव वाट्यालकोऽपि च।
महाबला पीतपुष्पा सहदेवी च सा स्मृता ॥
ततोऽन्यातिबला ऋष्यप्रोक्ता कङ्कतिकासह।
गाङ्गेरुकी नागबला भषा ह्रस्वा गवेधुका ॥
बलाचतुष्टयगुणाः।
बलाचतुष्टयं शीतं मधुरं बलकान्तिकृत्।
स्निग्धं ग्राहि समीरास्रपित्तास्रक्षतनाशनम् ॥
बलामूलत्वचश्चूर्णं पीतं सक्षीरशर्करम्।
मूत्रातिसारं हरति दृष्टमेतन्न संशयः ॥"
इति भावप्रकाशः ॥
"स्निग्धायुष्या बला उष्णा ग्राहिणी वातपित्तजित् ॥"
इति राजनिर्घण्टः ॥
(विद्याविशेषः। सा च ब्रह्मणः सुता। विश्वामित्रेण रामाय प्रदत्ता। अस्याः प्रभावात् क्षुधालस्यादिजनितक्लेशो न भवेत्। यथा, रामायणे। १। २२। ११—२२।
"अध्यर्द्धयोजनं गत्वा सरय्वा दक्षिणे तटे।
रामेति मधुरां वाणीं विश्वामित्रोऽभ्यभाषत ॥
गृहाण वत्स ! सलिलं माभूत् कालविपर्य्ययः।
मन्त्रग्रामं गृहाण त्वं बलामतिबलां तथा ॥
न श्रमो न ज्वरो वा ते न रूपस्य विपर्य्ययः।
न च सुप्तं प्रमत्तं वा धर्षयिष्यन्ति नैरृताः ॥
न बाह्वोः सदृशो वीर्य्ये पृथिव्यामस्ति कश्चन।
त्रिषु लोकेषु वा राम ! न भवेत् सदृशस्तव ॥
बलामतिबलाञ्चैव पठतस्तात राघव ! ॥
न सौभाग्ये न दाक्षिण्ये न ज्ञाने बुद्धिनिश्चये।
नोत्तरे प्रतिवक्तव्ये समो लोके तवानघ ! ॥
एतद्विद्याद्वये लब्धे न भवेत् सदृशस्तव।
बला चातिबला चैव सर्व्वज्ञानस्य मातरौ ॥
क्षुत्पिपासे न ते राम ! भविष्येते नरोत्तम !।
बलामतिबलाञ्चैव पठतस्तात राघव ! ॥
विद्याद्वयमधीयाने यशश्चाथ भवेद्भुवि ॥
पितामहसुते ह्येते विद्ये तेजःसमन्विते।
प्रदातुं तव काकुत्स्थ ! सदृशस्त्वं हि पार्थिव ! ॥
कामं बहुगुणाः सर्व्वे त्वय्येते नात्र संशयः।
तपसा सम्भृते चैते बहुरूपे भविष्यतः ॥
ततो रामो जलं स्पृष्ट्वा प्रहृष्टवदनः शुचिः
प्रतिजग्राह ते विद्ये महर्षेर्भावितात्मनः ॥
विद्यासमुदितो रामः शुशुभे भीमविक्रमः।
सहस्ररश्मिर्भगवान् शारदीव दिवाकरः ॥")

ब(व)लाकः, पुं, ( बलेन अकतीति। बल+अक+पचाद्यच्।) बकजातिः। इति भरतः ॥ ( पुरुपुत्त्रः। स च पौतगङ्गस्य जह्नोः पौत्रः। यथा, भागवते। ९। १५। ३।
"जह्नोस्तु पूरुस्तत्पुत्त्रो बलाकश्चात्मकोऽजकः ॥"
वत्सप्रीपुत्त्रभेदः। यथा, मार्कण्डेये। ११८।२।
"तस्य तस्यां सुनन्दायां पुत्त्रा द्वादश जज्ञिरे।
प्रांशुः प्रवीरः शूरश्च सुचक्रो विक्रमः क्रमः ॥
बली बलाकश्चण्डश्च प्रचण्डश्च सुविक्रमः ॥"
जातुकर्ण्यस्य मुनेः शिष्यविशेषः। यथा, श्रीभागवते। १२। ६। ५८।
"जातूकर्ण्यश्च तच्छिष्यः सनिरुक्तां स्वसंहिताम्।
बलाकपैलजाबालविरजेभ्यो ददौ मुनिः ॥"
राक्षसभेदः। यथा, मार्कण्डेये। ६६। ६४।
"तां जहाराद्रितनयो बलाको नाम राक्षसः ॥"
स्वनामख्यातो व्याधविशेषः। यथा, महाभारते। ८। ६९। ४०।
"मृगव्याधोऽभवत् कश्चित् बलाको नामभारत ॥")

ब(व)लाका, स्त्री, (बलते इति। बल संवरणे+बलाकादयश्च।"उणा० ४।१४। इति अक। यद्वा, बलेन अकतीति। बल+अक कुटिलगतौ+पचाद्यच्। ) बकजातिविशेषः। (यथा, मनुः। ५। १४।
"बकञ्चैव बलाकाञ्च काकोलं खञ्जरीटकम् ॥")
तत्पर्य्यायः। विषकण्ठिका २। इत्यमरः। २। ५। २५ ॥ विषकण्ठी ३ बलाकी ४। इति शब्दरत्नावली ॥ कारायिका ५ लिङ्गलिका ६। इति जटाधरः ॥ विषकण्ठी ७ गुच्छाङ्गा ८